# Shri Jnanamritarasayanam

# શ્રીજ્ઞાનામૃતરસાયનમ્

## Document Information

Text title : Shri Jnanamritarasayanam 02 48

File name : jnAnAmRRitarasAyanam.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-48

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# શ્રીજ્ઞાનામૃતરસાયનમ્

શ્રીપાર્વત્યુવાચ-
ભગવન્ દેવદેવેશ સર્વપાપપ્રણાશનમ્ ।
સર્વકામફલસ્તોત્રં જ્ઞાનામૃતરસાયનમ્ ॥ ૧॥

મહેશ્વરં મહાદેવમીશાનં શઙ્કરં હરમ્ ।
રુદ્રં ભદ્રં શિવં વિષ્ણું નીલકણ્ઠં પિતામહમ્ ॥ ૨॥

ઉગ્રં ભીમં શિવં સ્થાણું સ્વયમ્ભૂં શમ્ભુશૂલિનમ્ ।
પુરુષં ગૌરીશ્વરં ચન્દ્રં ચન્દ્રમૌલિં જટાધરમ્ ॥ ૩॥

ઉમાપતિં પશુપતિં વિરૂપાક્ષં વૃષધ્વજમ્ ।
વૃષં ગઙ્ગાધરં શઙ્કરં(શર્વં)શ્રીકણ્ઠં વૃષવાહનમ્ ॥ ૪॥

પિઙ્ગાક્ષજટિલં કૃત્તિવાસસં ગૃહાધરં (ચ ગુહાશયમ્) ।
ઊર્ધ્વનેત્રં સહસ્રાક્ષં સહસ્રભુજશીર્ષ(ક)મ્ ॥ ૫॥

મૃગાઙ્કચિહ્નં ભસ્માઙ્ગં દશબાહું ત્રિલોચનમ્ ।
ત્રિનેત્રં ત્રિષુ લોકેષુ ત્ર્યમ્બકં ત્રિપુરાન્તકમ્ ॥ ૬॥

કાલં કામાઙ્ગદહનં મન્ત્રકં દૈત્યઘાતકમ્ ।
(બ્રહ્મણઃ) પઞ્ચમશિરોદક્ષયજ્ઞવિનાશનમ્ ॥ ૭॥

પૂષદન્તહરં સાક્ષાત્તારકાસ્યનિપાતનમ્ ।
ઊર્ધ્વલિઙ્ગં મહાલિઙ્ગં ચારુલિઙ્ગં ત્રિલિઙ્ગિનમ્ ॥ ૮॥

વાચસ્પતિં દિવ્યચક્ષું બ્રહ્મસ્કન્ધાય દેશિકં (?) ।
ઊર્ધ્વરેતં વીતરાગં તતો ધર્મદૃઢવ્રતમ્ ॥ ૯॥

જર્ઝરીડિણ્ડિમુણ્ડં ચ ત્રિદણ્ડિલકુલીજટં (?) ।
ગજચર્મપરીધાનં પલલાજિનવાસસમ્ ॥ ૧૦॥

વિશ્વાનનં મહાવાસં મૃતવાસં ચતુષ્કલમ્ ।

ચર્યારૂઢં (વિ)માનસ્થં વાનપ્રસ્થં ચ શૂલિનમ્ ॥ ૧૧॥

કપાલખટ્વાઙ્ગહસ્તં કઙ્કમાલાશિરોધરમ્ ।
વ્યાલોપવીતનિલયં મહાકુણ્ડલિનૂપુરમ્ ॥ ૧૨॥

મહાદંષ્ટ્રં મહાકાયં મહાશીર્ષસુશોભનમ્ ।
મહાસિદ્ધં મહાવીરં સન્નદ્ધં વીરવન્દિતમ્ ॥ ૧૩॥

અઘોરં ઘોરસંશિષ્ટં ઘોરાદ્ઘોરતરં તથા ।
હિરણ્યવર્ણં દેવાદિં બ્રહ્મણ્યમભવં ભવમ્ ॥ ૧૪॥

પઞ્ચાક્ષરં પઞ્ચબીજં પઞ્ચવક્ત્રં સદાશિવમ્ ।
ષડ્વક્ત્રં મહાગુહ્યં કાલાગ્નિં રુદ્રતેજસમ્ ॥ ૧૫॥

અષ્ટધા નવધા ચૈવં દશધા શતધા સ્મૃતમ્ ।
બહુરૂપં મહારૂપં વિશ્વરૂપં જગદ્ગુરુમ્ ॥ ૧૬॥

કલિતં ?? કાલોત્પત્તિકુલેશ્વરમ્ ।
ધન્વન્તરિં બ્રહ્મવિદં પુણ્ડરીકં પ્રજાપતિમ્ ॥ ૧૭॥

વેદ્યવેદવિધાત્રર્થં યોગજ્ઞાનવિચક્ષણમ્ ।
ધ્યાનં ધ્યેયં ચ તત્પૂજ્યં પરસ્ય જ્ઞાનમુત્તમમ્ ॥ ૧૮॥

સ્વાહાસ્વધાવષટ્કારં (હેમપાર્શ્વં) હુતાશનમ્ ।
યજ્ઞાતીર્થં ?? સર્વતોમુખં (?) ॥ ૧૯॥

સકલં નિષ્કલં શૂન્યં સ્થૂલં સૂક્ષ્મં પરાપરમ્ ।
અનન્તં ધ્યેયરહિતં તારદ્વારવધાન્તિકમ્ ॥ ૨૦॥

બિન્દુનાદકલાક્રાન્તં પ્રાણાપાનપ્રવાહનમ્ ।
પરિપૂર્ણં હતારાતિમૂર્ધ્વમધ્યવ્યવસ્થિતમ્ ॥ ૨૧॥

માત્રાર્થકં માત્રપદમદધ્વાધ્વા પરાપરં (?) ।
અસ્વતન્ત્રો સ્વતન્ત્રોઽયમસ્તુ નાસ્તુ જયાપરં (?) ॥ ૨૨॥

અવિદિત્વા તુ વિદિતમપ્રમાણપ્રમાણકમ્ ।
નિસ્સંશયં નિરાપેક્ષં નિધાનસ્થં નિરેપનમ્ ॥ ૨૩॥

નિર્વિકલ્પં નિષ્પ્રપઞ્ચમદ્વૈતં કેવલં પ્રભુમ્ ।
વ્યોમાતીતં મનુશ્ચાર્યમનન્તમજમવ્યયં (?) ॥ ૨૪॥

અષ્ટોત્તરં દ્વાદશાન્તં ધનાખ્યં શૂન્યવાચકં (?) ।
વિષ્ણુધર્મં વિનિષ્ઠાન્તં નિસ્તરઙ્ગં નિરામયમ્ ॥ ૨૫॥

નકિઞ્ચિત્ કિઞ્ચિદાનન્દં પરમાત્માનુલેપનમ્ ।
પરાભ્યાં રત્નમારૂઢં (પરાભ્યન્તરમારૂઢં) અધિકં તત્પરાપરમ્ ॥ ૨૬॥

દેવાનાં પરમં દેવં પ્રણમેયં મહેશ્વરમ્ ।
સંસારદુઃખદહનમાયુરારોગ્યનિર્મિતમ્ ॥ ૨૭॥

સર્વપાપક્ષયકરં સર્વરોગનિબર્હણમ્ ।
સન્તતં શ્ૃણુ તં હ્યસ્તુ જ્ઞાનામૃતરસાયનમ્ ॥ ૨૮॥

તીર્થકોટ્યસ્તુ યજ્ઞાનાં મન્ત્રકોટ્યસ્તુ યજ્ઞકમ્ । (?)
??વ્રતં પુણ્યં સ્વાધ્યાયં મન્ત્રનાયકમ્ ॥ ૨૯॥

વિશ્વેશં ચ ત્રિકાલજ્ઞમણિમાદિગુણાષ્ટકમ્ ।
પરાપરં પરાવાપ્તિસ્વર્ગમોક્ષપ્રદાયકમ્ ॥ ૩૦॥

અમૃતાક્ષં મૃત્યુજયમનાઢ્યં તં શુભં વૃષં (?) ।
પરમાક્ષરમોઙ્કારં ષડઙ્ગં મન્ત્રનાયકમ્ ॥ ૩૧॥

અવાપ્તં મન્ત્રદેશાખ્યં વ્યોમરુધ્યચતુષ્કલમ્ ।
દશબીજં મહાવજં વૈદિકં રૌદ્રવૈષ્ણવમ્ ॥ ૩૨॥

આરૂઢં તૌડ્ડિકં સૌરં ભૈરવં પાપદક્ષિણમ્ ।
ગોપિતં સંહ્યલં મન્ત્રઃ સર્વમન્ત્રપ્રવર્તકમ્ ॥ ૩૩॥

એકં પઞ્ચાશદ્વર્ણાનાં મૂલકં વર્ણભેદકં (?) ।
પઞ્ચમાત્રસ્થૂલભેદમેકાશીતિદલાત્મકમ્ ॥ ૩૪॥

અષ્ટાત્રિંશત્કલાધારં ત્રિષષ્ટિભેદસંસ્થિતમ્ ।
અનાહતં ચતુષ્ષષ્ટિકલાભિશ્ચૈકમક્ષરમ્ ॥ ૩૫॥

નિત્યસ્થિતં હંસગર્ભં શિવભક્તિં શિવાત્મકમ્ ।
આદ્યન્તમધ્યનિલયં સ્તુતિં મિશ્રામનોપમમ્ ॥ ૩૬॥

જાગ્રત્સ્વપ્નસુષુપ્તિસ્થં પૂરકં કુમ્ભરેચકમ્ ।
અવિભક્તમનેકૈકં નાભૂતં ચ પૃથક્ પૃથક્ ॥ ૩૭॥

અનેકાધારવદનં મન્ત્રશાસ્ત્રાઙ્ગમાલયમ્ ।
ઇચ્છાજ્ઞાનઙ્ક્રિયાશક્તિમન્ત્રશક્ત્યાત્મનોદયમ્ ॥ ૩૮॥

દક્ષિણોત્તરમધ્યસ્થં ?? ।
હેમકોટીસ્તુ યો દદ્યાત્કપિલાકોટયો દદેત્ ॥ ૩૯॥

મહીં કાઞ્ચનસમ્પૂર્ણાં રત્નાનાં સપ્તસાગરાત્ ।
કુરુક્ષેત્રે કનખલે ચન્દ્રસૂર્યગ્રહે વરે ॥ ૪૦॥

એતત્સર્વેષુ દાનેષુ યત્પુણ્યં ફલતે ફલમ્ ।
તત્ફલં લભતે મર્ત્યઃ સ્તવસ્યાસ્યાનુકીર્તનાત્ ॥ ૪૧॥

કુલકોટિં સમુદ્ધૃત્ય શિવલોકે મહીયતે ।
સર્વપાપવિશુદ્ધાત્મા મુક્તિરેવ ન સંશયઃ ॥ ૪૨॥

॥ ઇતિ શ્રીજ્ઞાનામૃતરસાયનં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Jnanamritarasayanam*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*